मोक्षार्थी च गुरुं यत्नात् शुश्रूषेणैव तोषयेत् ।
शुश्रूषेणैव यल्लब्धं[6] तद्विद्यात्[7] सर्वसिद्धिदम्[8] ॥१६॥

नो देयं (या)[9] विद्यया विद्या वित्तकांक्षी तथैव च ।
सच्छिष्याय प्रदातव्यं[10] धनदेहाद्यवञ्चकैः ॥१७॥

दुरालापसमायुक्तं दुर्गुणेन समन्वितम् ।
सर्वथा वर्जयेच्छिष्यं स्वगुरोर्वाभिमानिनम्[11] ॥१८॥

भ्रष्टपाशसमायुक्तं भ्रष्टाचारसमन्वितम् ।
सर्वदा वर्जयेच्छिष्यं गुरुसेवाविवर्जितम्[12] ॥१९॥[13]

निर्मत्सरं निरालम्बं नीतिशास्त्रविशारदम् ।
नित्यानित्यविवेकं च शिष्यत्वेनोपकल्पयेत् ॥२०॥

श्रद्धाभक्तिसमोपेतं धनदेहाद्यवञ्चितम्[14] ।
भ्रष्टपाशविनिर्मुक्तं शिष्यत्वेनोपकल्पयेत् ॥२१॥

गुरुशिष्यावुभौ मोहादपरीक्ष्य[15] परस्परम् ।
उपदेशं ददन् गृह्णन् प्राप्नुयात्तौ पिशाचताम् ॥२२॥

इति षड्विद्यागमे सांख्यायनतन्त्रे द्वितीयं पटलम्[16] ॥

---

१. ख. तोषयेच्छ्रेष्ठमन्वहम्; ग. तोषयेच्छिष्यमन्वहम्; घ. संतोष्याभीष्टसिद्धिदम् । २. ख. ०मर्भकः । ३. क.ख.ग. तद्विद्या । ४. घ. तद्वत्तं । ५. घ. स्मृतम् । ६. ग. यल्लभ्यं; घ. यं लब्ध्वा । ७. क. ग. तद्विद्या; घ. सा विद्या । ८. घ. सर्वसिद्धिदा । ९. ग. नोपदेयं । १०. घ. प्रदातव्या । ११. घ. गुरुसेवाभिमानिनम् । १२. ग. घ. गुरुसेवाभिमानिनम् । १३. घ. पुस्तके विशेषोऽयं श्लोकः—

'कामुकं काञ्चनासक्तं करुणालयवर्जितम् ।
सर्वदा वर्जयेच्छिष्यं गुरुसेवाभिमानिनम्' ॥

१४. ख. घ. ०वञ्चकम् । १५. ख. ०दपरोक्ष्य; ग. ०दपराक्ष । १६. ख. घ. द्वितीयः पटलः ।

।। अथ तृतीयः पटलः ।।

चलत्कनककुण्डलोल्लसितचारुगण्डस्थलां[1]
लसत्कनकचम्पकद्युतिमदिन्दुबिम्बाननाम् ।।
गदाहतविपक्षकां कलितलोलजिह्वाञ्चलां[2]
स्मरामि बगलामुखीं विमुखवाङ्मुखस्तम्भिनीम्[3] ।।१।।

क्रौञ्चभेद उवाच —[4]

पूजाधारणयन्त्रज्ञ[5] सर्वमन्त्रविशारद ।
अभिषेकविधिं तात वद मे करुणाकर ।।२।।

ईश्वर उवाच[6] —

आश्विने कार्त्तिके चैव[7] चैत्रमासे[8] कुमारक ।
कुर्युस्तमभिषेकं[9] च मानवाः[10] सिद्धिकांक्षिणः[11] ।।३।।
रवौ गुरौ भृगावब्जवासरे[12] च कुमारक ।
मन्त्राभिषेकं कर्त्तव्यं सततं सिद्धिकांक्षिभिः ।।४।।
रोहिणीश्रवणे चैव पुष्ये[13] चैव विशाखयोः ।
मन्त्राभिषेकं कर्त्तव्यं सद्यः[14] सिद्धिकरं भुवि ।।५।।
एवं शुद्धदिने[15] सम्यक् पूर्वेऽह्नि[16] समुपोषितम् ।
स्नापयेत्पञ्चगव्येन ततश्चामलकेन तु ।।६।।
ततः शिष्यं समानीय[17] देवतासन्निधौ पुनः ।
अयुतं प्रजपेन्मन्त्रं गायत्रीजपमाचरेत्[18] ।।७।।
देवस्येशानभागे तु गोमयेनोपलेपितम्[19] ।
रङ्गवल्ल्या लिखेद्यन्त्रं रक्तपीतसितासितैः ।।८।।

---

१. ग. पुस्तके 'चलत्कनककुण्डलो' इत्यस्मादग्रेतनपदांशो नास्ति । घ. चलत्कनककुण्डलां लसत्० । २. घ. कलितवैरि० । ३. ख. घ. विमुखवाङ्मनः । ४. ख. घ. क्रौञ्चभेदन उवाच; ग. क्रौञ्चभेदनोवाच । ५. क. पुस्तके 'पूजा' स्थाने 'पूज्य' एवं च ख. पुस्तके 'यन्त्रज्ञ' स्थाने 'यन्त्रज्ञं' इति शब्दौ स्तः । ६. ग. पुस्तके 'क्रौञ्चभेदनोवाच' तथा च 'ईश्वरोवाच' इत्येवायं प्रयोगः सर्वत्र दृश्यते; अतोऽग्रे एतच्छब्दयो रेष एव पाठान्तर ऊहनीयो विद्वद्भिरिति । ७. ख. चैत्रे । ८. ख. वैशाखे तु । ९. ख. ग. कर्त्तव्यमभिषेकं; घ. कर्त्तव्यं चाभिषेकं । १०. ख. ग. मानवैः । ११. ख. ग. सिद्धिकांक्षिभिः । १२. ग. भृगा[वि]दौ०; घ. भृगौ इंदु० । १३. ग. स्वार्सी । घ. सार्पं । १४. ग. सर्वं । १५. ग. सिद्धिदिने । १६. ग. पूर्वेवह्नि; घ. पूर्वाह्णे । १७. ग. घ. समानीत्वा । १८. घ. गायत्रीं वेदमातरम् । १९. क. ग. ०लेपिताम्; ख. ०लेपयेत् ।

षोडशाङ्गुलमानं[1] तु लिखेद् बिन्दुमनन्यधीः ।
ततो(तदु)परि लिखेद् वृत्त[2]मष्टपत्रं तु शोभनम् ॥९॥
प्रियङ्गुशालिगोधूमचरणकाटकमाषकैः[3] ।
कुलत्थमुद्गनीवारैः[4] क्रमान्मध्यादि विन्यसेत् ॥१०॥
प्रस्थं चैव चतुर्विंशं प्रत्येकं धान्यमेव च ।
अव्रणं स्थूलकलशं मध्ये संस्थाप्य बुद्धिमान् ॥११॥
अष्टपत्रे[5] न्यसेत्पुत्र कलशाष्टकमादरात् ।
क्षालितं वासितं[6] शुद्धं कलशं च समर्पयेत्[7] ॥१२॥
षोडशैरुपचारैश्च धूपाद्येनैव[8]विन्यसेत् ।
आपोवानेन पूर्येत नदीजलमकल्मषम् ॥१३॥
निःक्षिपेन्नवभाण्डेषु नवरत्नान् कुमारक ।
कस्तूरीचन्दनोपेतान्[9]नवभाण्डेषु निःक्षिपेत् ॥१४॥
मध्ये देवीं समावाह्य चिन्मयीं बगलामुखीम् ।
प्राणस्थापनमार्गेण केरलोक्तविधानतः ॥१५॥
वाणी चैव रमा गौरी शची स्वाहा रतिस्तथा ।
दुर्गा छाया[10] समभ्यर्च्य पूर्वाद्यष्टकपत्रयोः[11] ॥१६॥
अर्चयेत्पूर्ववत्पुत्र केरलोक्तविधानतः ।
नवीननवसंख्याकवस्त्रेणैव तु वेष्टयेत् ॥१७॥
सुगन्धपत्रपुष्पादीन्[12] विन्यसेत्कलशान्तरे ।
तत्र शिष्यं[13] समानीत्वा(य)ऋत्विग्वरणमाचरेत् ॥१८॥
वेदवेदांगपारीणमष्टौ[14] ब्राह्मणमादरात् ।
प्रार्थयेद्युग्मसंयुक्त[15]मर्चयेद्वस्त्रभूषणैः ॥१९॥
शाकुनादिषु मन्त्रेषु प्रथमं कलशमार्जनम्[16] ।
लक्ष्मीसूक्तेन श्रीयुक्तं[17] द्वितीयं कलशन्तथा[18] ॥२०॥

---

१. ख. ०माने । २. ख. ०पद्म । ३. ग. घ. चणकाढकमाषकौ । ४. घ. ०नीवारा । ५. ख. अत्र पत्रे । ६. क. चासितं । ७. ख. ग. घ. समर्चयेत् । ८. घ. धूपाद्यैः परि । ९. घ. ०चन्दनोपेत । १०. घ. पुस्तके वाण्यादिशब्दा द्वितीयान्ता दृश्यन्ते । ११. घ. पूर्वाद्यष्टकसिद्धयः । सुगन्धि पुत्र० ; घ. सुगंधं पुत्र पुष्पादि । १३. ग. शिषां । १४. घ. ०पारीणानष्टौ । १५. घ. ०दर्घ्यसंयुक्त० १६. घ. कुम्भमार्जनम् । १७. घ. श्रीयुक्तैः । १८. घ. कुम्भमार्जनम् ।

पौरुषेणैव सूक्तेन तृतीयं कलशं तथा[१] ।
नारायणानुवाकेन[२] चतुर्थं रुद्रसूक्तकैः[३] ॥२१॥
पञ्चब्रह्ममयैर्मन्त्रैः[४] पञ्चमं कलशं तथा ।
षष्ठं चाम्भस्यवारेण[५] ब्रह्मपल्ल्या च[६] सप्तमम् ॥२२॥
अष्टमं कठवल्ल्या[७] च मार्जयेन्मन्त्रकोविदः[८] ।
मध्यमं[९] पूर्वकलशं[१०] मूलमंत्रेण[११] मार्जयेत् ॥२३॥
एवञ्च मार्जनं कृत्वा नवीनैर्वस्त्रभूषणैः ।
अलंकृत्वा तु शिष्यं[१२] तमानीय[१३] मण्डपान्तरे ॥२४॥
वामोरूपरि विन्यस्य मूर्द्धनि चाघ्राय सादरात् ।
एकैकं च पुरश्चर्यामूलमन्त्रं कुमारक ॥२५॥
स हिरण्योदके पूर्वं दद्याच्छिष्याय पुत्रक ।
स्वहृत्कमलमध्यस्था विद्यां ज्योतिर्मयीं पुनः ॥२६॥
शिष्यस्य हृदयं चैव प्रविशन्तीति भावयेत् ।[१४]
तद्वच्छिष्यस्तु[१५] संभाव्य गुरुं यत्नेन तोषयेत् ॥२७॥
एवं मन्त्राभिषेकञ्च[१६] कुर्याद् ब्रह्मास्त्रविद्यया ।
सद्यः[१७] सिद्धिर्भवेत्पुत्र पुरश्चर्यां विना[१८] भुवि ॥२८॥

इति षड्विद्यागमे[१९] सांख्यायनतन्त्रे तृतीयं पटलम्[२०] ॥३॥

---

१. घ. कुम्भमार्जनम् । २. ख. ०नुवाक्येन; ग. नुजाकेन ; घ. पादांशो नास्ति । ३. ख. ग. कलशं तथा ; घ. कुम्भमार्जनम् । ४. घ. ०ब्रह्ममयी० । ५. ख. चाभंस्य चारेण ; घ. चांभस्य पारेण । ६. ख. ग. ब्रह्मवल्ल्या च ; घ. ब्रह्मवल्ल्या तु । ७. ख. ग. कंठवल्ल्या ; घ. भृगुवल्ल्या । ८. घ. अथवा कठकेन च । ९. घ. मध्यस्थं । १०. ग. घ. पूर्णकलशं । ११. घ. मुक्तमंत्रेण । १२. घ. तच्छिष्यं । १३. घ. आनीत्वा । १४. घ. पुस्तकेऽयं विशेष पाठः—

"तत्प्रयोगं तत्र उक्त्वा तन्मंत्राणां पदे पदे ।
ष्ठक्रमोदकं कृत्वा प्रत्येकं च विभावयेत् ॥
विद्यारूपे भवेत् पुत्र साम्राज्यं परिवेष्टयेत् ।"

१५. घ. तद्वच्छिष्यं तु । १६. घ. मन्त्राभिषिक्तं च । १७. घ. सर्वं । १८. घ. पुरश्चर्यादिना । १९. ख. ०गमरहस्ये । २०. घ. ०दीक्षाविधितृतीयपटलः ।

॥ अथ चतुर्थः पटलः ॥

पीयूषोदधिमध्यचारुविलसद्रत्नोज्ज्वले मण्डपे,
श्रीसिंहासनमौलिपातितरिपुप्रेतासनाध्यासिनीम् ।
स्वर्णाभां करपीडितारिरसनां भ्राम्यद्गदां बिभ्रतीं,
स्वप्ने[1] पश्यति तस्य यांति विलयं सद्योऽम्ब[2] सर्वापदः ॥१॥

क्रौञ्चभेद(दन) उवाच—

गङ्गाधर नमस्तेऽस्तु गौरोपति[3] नमो नमः ।
ब्रह्मास्त्रमन्त्रसंध्यां च वद मे करुणाकर ॥२॥

ईश्वर उवाच—

मन्त्रमध्यापयेत्[4] सम्यक् शिष्यस्य गुरुरादरात् ।
तदारब्धं[5] तु तन्मन्त्रं[6] मन्त्रसन्ध्यां समाचरेत्[7] ॥३॥
तन्मन्त्रसंध्यां वक्ष्यामि शरजन्मन् समासतः ।
मन्त्रसन्ध्याविहीनस्य सर्वं तन्निष्फलं भवेत् ॥४॥
पञ्चाङ्गविधिना स्नात्वा मन्त्रस्नानमनन्तरम्[8] ।
ततः स्नायादङ्गमन्त्रैर्मूलेनैव तु मार्जयेत् ॥५॥
धौतवस्त्रं परीधाय स्वगृह्योक्तविधानतः ।
नित्यकर्म समाप्याथ मन्त्रसंध्यां समाचरेत् ॥६॥
अङ्कुशेनैव मुद्रायाः[9] सूर्यमण्डलगं जलम् ।
आनयेत्तोयमध्ये तु ध्यानयोगेन बुद्धिमान् ॥७॥
आवाहिनी स्थापनी च सन्निधानमतः[10] परम् ।
सन्निरोधनमुद्रा च सम्मुखी प्रार्थनी तथा ॥८॥
एता मुद्राश्च ततो[11] दर्शयेत्साधकोत्तमः ।
शोधयेदङ्कुशेनादौ[12] चामृतीकरणं[13] ततः[14] ॥९॥
तज्जलं वामचुलुके गृहीत्वा साधकोत्तमः ।
मूलेनैव त्रिधामन्त्र्य अष्टपत्राम्बुजं लिखेत् ॥१०॥

---

१. घ. यस्त्वां । २. ग. सद्योप । ३. ख. ग. घ. गौरीप्रिय । ४. घ. मंत्रसंध्यापंयेत् । ५. ख. घ. तदारम्भ्य । ६. ख. घ. तन्मन्त्रैः । ७. घ. समाचर । ८. घ. ०मतः परम् । ९. ख. मुद्रयाः अंकुशेनैव । १०. क. सन्निध्यानमतः । ग. सन्निधापनीतः । ११. ख. सततं । घ. तत्तोये । १२. घ. नादा । १३. घ. वामृती० । १४. घ. तथा ।

मध्ये एकाक्षरीमन्त्रं बगलानाम्नि पुत्रक ।
वेदसंख्यामन्त्रवर्णान्[1] सप्तपत्रे[2] क्रमाल्लिखेत् ॥११

अन्त्यपत्रे चाष्टवर्णां[3]ल्लिखेन्मूलमनुं तथा ।
पुनरेकाक्षरं मन्त्रं त्रिसप्तमभिमन्त्रयेत्[4] ॥१२॥

तेन मूलेन सम्मार्ज्य मार्जनक्रमतोऽर्भक ।
तन्मार्जनविधिं वक्ष्ये ऐहिकामुष्मिकेषु च[5] ॥१३॥

त्रिधा मूर्द्धनि द्विधा बाह्वोस्त्रिधा हृन्नाभिदेशयोः ।
द्विधा पादेषु सम्मार्ज्य सौम्यकर्मस्वयं[6] क्रमः[7] ॥१४॥[8]

एवञ्च मार्जनं कृत्वा गायत्र्या बगलाह्वया ।
अर्घ्यत्रयञ्च निष्क्षिप्य हृदि संभाव्य देवताम् ॥१५॥

मूलेन मन्त्रितं तोयं त्रिवारञ्च त्रिधा क्षिपेत्[9] ।
एवमेव त्रिकालञ्च मन्त्रसन्ध्यां समाचरेत् ॥१६॥

उपस्थानं त्रिकालस्य वक्ष्येऽहं क्रौञ्चभेदन ।
उपस्थानं विना सन्ध्या निष्फला[10] नात्र संशयः ॥१७॥
गम्भीरां च मदोन्मत्तां स्वर्णकान्तिसमप्रभाम् ।
चतुर्भुजां त्रिनयनां कमलासनसंस्थिताम् ॥१८॥

मुद्गरं दक्षिणे पाशं वामे जिह्वां च बिभ्रतीम्[11] ।
पीताम्बरधरां सौम्यां दृढपीनपयोधराम् ॥१९॥

हेमकुण्डलभूषाङ्गीं पीतचन्द्रार्द्धशेखराम् ।
पीतभूषणभूषाङ्गीं स्वर्णसिंहासने स्थिताम् ॥२०॥[12]

एवं ध्यात्वा तु देवेशीं[13] प्रातः सन्ध्यां समाचरेत् ।
उपस्थानं प्रवक्ष्यामि मध्याह्नस्य[14] कुमारक ॥२१॥

दुष्टस्तम्भनमुग्रविघ्नशमनं दारिद्र्यविद्रावणम्,
भूभृत्स्तंभनकारणं मृगदृशां चेतःसमाकर्षणम् ।

---

१. घ. देवसंख्या । २. क. घ. सप्तपत्रैः ३. घ. अन्त्यषृपत्रे अष्टार्णं । ४. ख. त्रिः सप्त० । ५. ख. वा । ६. ख.ग. ०कर्मभ्वय । घ. मार्गेष्वयं । ७. घ. क्रमात् । ८. घ. पुस्तके विशेषः पाठः

"पादादिमूर्द्धनिपर्यन्तं क्रूरकर्मेषु मार्जयेत्" ।

९. ख. घ. पिबेत् । ग. पुनः । १०. घ. निष्फलं । ११. क. विभ्रकम् । ग. घ. वज्रकम् । १२. घ. पुस्तकेऽयमंशो विशेषः—

"रत्नसिंहासनां वन्दे देवीं त्रैलोक्यसुन्दरीम्" ।

१३. ग. देवेशि । घ. देवेशं । १४. घ. मध्याह्ने च ।

सौभाग्यैकनिकेतनं मम दृशोः कारुण्यपूर्णेक्षणं[1],
विघ्नौघं बगले हर प्रतिदिनं कल्याणि तुभ्यं नमः ॥२२॥
एवं मध्यंदिनोपास्थि[2] कुरु[3] कर्म सुपुत्रक[4]।
'उपस्थानं प्रवक्ष्यामि'[5] सायाह्नस्य कुमारक ॥२३॥

मातर्भञ्जय मद्विपक्षवदनं जिह्वाञ्चलां कीलय
ब्राह्मी मुद्रय[6] मुद्रयाशु धिषणामंघ्रचोर्गतिं स्तम्भय ।
शत्रूंश्चूर्णय चूर्णयाशु गदया गौराङ्गि पीताम्बरे[7],
विघ्नौघं बगले हर प्रतिदिनं कल्याणि तुभ्यं नमः ॥२४॥

सायमौपास्थि[8]कर्तव्यमेवमेव[9] कुमारक ।
विघ्नग्रहविनाशाय[10]'एवं ध्यायेज्जगन्मयीम्[11] ॥२५॥
मन्त्रसन्ध्यां विना मन्त्रं कोटिकोटि जपन्ति ये[12]।
न भवेन्मौनसिद्धाद्यै[13]र्मन्त्रसिद्धिः कुमारक ॥२६॥
त्रिकालमाचरेत्सन्ध्यामुपस्थानं तथैव च ।
सहस्रं च जपेन्नित्यं सिद्धिः षण्मासतो भवेत् ॥२७॥
पूर्वोक्तविधिवत्संध्यां कृत्वा चाष्टोत्तरं जपेत् ।
यं यं वापि स्मरन्[14] पुत्र तं तं प्राप्नोति निश्चितम् ॥२८॥
सन्ध्यामन्त्रेषु सर्वेषु[15] अङ्गमेव कुमारक ।
न प्रसिद्ध्यत्यङ्गहीनं[16] तस्मात्सन्ध्यां समाचरेत् ॥२९॥

इति षड्विद्यागमे सांख्यायनतंत्रे चतुर्थं पटलम्[17]॥४॥

॥ अथ पञ्चमः पटलः ॥

पीतवर्णां मदाघूर्णां समपीनपयोधराम् ।
चिन्तयेद् बगलां देवीं स्तंभनास्त्राधिदेवताम् ॥१॥

क्रौंचभेदन उवाच—

नमस्तेऽस्तु जगन्नाथ भस्मोद्धूलितविग्रह ।
एकाक्षरीमहामन्त्रं बगलाख्यं महाप्रभो[18] ॥२॥

---

१. ख. कारुण्यपूर्वेक्षणं । २. घ. ०पास्ति । ३. घ. क्रूर । ४. घ. पुस्तके विशेषः पाठः—
"उपस्थानं चैवमेतत्कर्त्तव्यं विधिवन्नरः" ।
५. '–' चिह्नगतोंऽशो नैवास्ति घ. पुस्तके ।
६. ग. पुस्तके नास्ति । ७. घ. पीताम्बरी । ८. घ. ०मौपास्ति । ९. घ. ०मन्हो मेव । १०. घ. ०विनाशे च । ११. घ. ध्यायं० । १२. घ. जपेन तु । १३. घ. ०मौनिसिद्धाद्यं । १४. घ. स्मरेत् । १५. घ. पूर्वेषु । १६. ख. न च सिद्धयत्यंगहीना । १७. घ. ०सन्ध्याविधिर्नाम चतुर्थः पटलः । १८. घ. वद प्रभो ।

ईश्वर उवाच—

तत्तदेकाक्षरीबीजं तत्तन्मन्त्रेषु जीवनम् ।
उत्तमं बीजमुक्तं[1] च मन्त्रसर्वार्थसाधनम्[2] ॥३॥
नानामन्त्रेषु मन्त्रं वा बीजाढ्यं[3] सर्वसिद्धिदम् ।
निर्बीजमेव निर्वीर्यं शिवस्य वचनं यथा[4] ॥४॥[5]
तद्बीजोद्धारमनघं[6] सर्वसिद्धिप्रदायकम् ।
पूजनं[7] च प्रयोगं च वक्ष्येऽहं तव पुत्रक ॥५॥
सान्तं रान्तसमायुक्तं चतुर्थस्वरसंयुतम् ।
रेफाक्रान्तं बिन्दुयुक्तं ब्रह्मास्त्रैकाक्षरं(रो) मनुः[8] ॥६॥
ब्रह्मा ऋषिश्च छन्दोयं(न्दोऽस्य)गायत्री समुदाहृतम् ।
देवता बगला नाम[9] शक्तिश्चिन्मयरूपिणी ॥७॥
लँ बीजं ह्लीं च शक्तिश्च ईं कोलकमुदाहृतम् ।
न्यासविद्यां प्रवक्ष्यामि मन्त्रसिद्धिकरं[10] नृणाम् ॥८॥
भूशुद्धिं भूतशुद्धिञ्च मातृकाद्वितयं न्यसेत् ।
पञ्चाक्षरेण[11] विन्यस्य तद्विधिं शृणु पुत्रक ॥९॥
नेत्रबाणं पुनः पञ्च नव पञ्चदशाक्षरम् ।
विन्यसेदंगुलीभिश्च षडङ्गेषु तथैव च ॥१०॥
वक्ष्येऽहं पञ्जरं न्यासं मन्त्रसिद्धिकरं नृणाम् ।
बगला पूर्वतो रक्षेदाग्नेय्यां च गदाधरी ॥११॥
पीताम्बरा[12] दक्षिणे च स्तम्भिनी चैव नैऋते[13] ।
जिह्वाकीलिन्यतो रक्षेत्[14] पश्चिमे सर्वतोमयी[15] ॥१२॥
वायव्ये च मदोन्मत्ता कौबेरे[16] च त्रिशूलिनी ।
ब्रह्मास्त्रदेवतैशान्ये[17] पाताले स्तंभमातरः[18] ॥१३॥

---

१. घ. बीजयुक्तं । २. घ. मंत्रं सर्वार्थसाधकम् । ३. घ. बीजाज्यं । ४. घ. तथा
५. घ. अयमंशो विशेषः—'एकाक्षरी बगला उद्धारं' । ६. ख. ०मनघ । ७. ग. योजनं ।
८. ख. मनुम् । ९. ख. घ. नाम्नी । १०. ख. ०सिद्धिकरीं । ११. ख. घ. मन्त्राक्षरेण । १२. घ. पीताम्बरी । १३. घ. नैऋतो । १४. घ. जिह्वां कीलयतो रक्षो ।
१५. ख. सर्वचिन्मयी । ग. सर्वंतामयि । घ. सर्वंतोमयि । १६. घ. कोबेर्यां । १७. ख. घ. ०देवतेशान्ये । १८. घ. पातालस्तब्धमातृकः ।

ऊर्द्ध्वं रक्षेन्महादेवी जिह्वास्तम्भनकारिणी ।
एवं दश दिशो रक्षेद् बगला सर्वसिद्धिदा ॥१४॥
एवं न्यासविधिं कृत्वा यत्किञ्चिज्जपमाचरेत् ।
तस्य संस्मरणादेव[1] शत्रूणां स्तम्भनं भवेत् ॥१५॥
सर्वं[2] न्यासविधिं कृत्वा बगलामातृकां न्यसेत् ।
तन्मातृकाविधिं वक्ष्ये सारात्साररतरं तथा ॥१६॥
तारञ्च मातृकावर्णं[3] बगलाबीजमेव च ।
नमोऽन्तेन च विन्यस्य मातृकास्थानतोऽनघ ॥१७॥
ध्यानेन[4] मन्त्रसिद्धि: स्याद् ध्यानं सर्वार्थसाधनम्[5] ।
ध्यानं विना भवेन्मूक: सिद्धमन्त्रोऽपि पुत्रक ॥१८॥

वादी मूकति रङ्कति क्षितिपतिर्वैश्वानर: शीतति,
क्रोधी शांतति दुर्जन: सुजनति क्षिप्रानुग: खञ्जति ।
गर्वी खर्वति सर्वविच्च जडति त्वद्यंत्रिणा[6] यन्त्रित:[7],
श्रीनित्ये बगलामुखि प्रतिदिनं कल्याणि तुभ्यं नम: ॥१९॥

एवं ध्यात्वा जपेन्मन्त्रं[8] तत्वलक्षं सुबुद्धिमान् ।
गुडोदकेन सन्तर्प्य तद्दशांशं कुमारक ॥२०॥
त्रिकोणकु[illegible] जुहुयाद्धस्तनिम्नोन्नते शुभे ।
हयारि[illegible]नैव सरक्तेनाज्यसंयुतम्[9] ॥२१॥
ब्राह्मणान् भोजयेत्पश्चात् तत्वसंख्या तु युग्मकम् ।
मन्त्रसिद्धिर्भवेत्पुत्र नान्यथा शिवभाषितम्[10] ॥२२॥
वाममार्गक्रमेणैव वामामभ्यर्च्य पुष्पिणीम् ।
मन्त्रसिद्धिकरं चैतत्[11] सर्वदा रिपुनाशनम् ॥२३॥
परमन्त्रप्रयोगेषु नानाकृत्त्रिमचेटकै: ।
सद्य: स्तम्भनविद्या च[12] बगला च न संशय: ॥२४॥

इति षड्विद्यागमे सांख्यायनतन्त्रे पंचमं पटलम्[12] ॥४॥

---

१. घ. ०द्देव । २. ग. घ. सर्वं । ३. ख. मातृकावर्णः । ग. मातृकावर्णं । ४. घ. न्यासेन । ५. घ. ०साधकम् । ६. ग. त्वद्यंत्रिणां । घ. त्वद्यंत्रिणो । ७. घ. यंत्रितो । ८. घ. जपेन्मूलम् । ९. ख. सरक्तेन्याज्य० । ग. सरक्तेनाह्य० । १०. घ. शिवभाषणम् । ११. घ. चैव । १२. ख. स्तंभनकृद्विद्या । घ. स्तंभनविद्यादि । १३. ग. ०एकाक्षरमंत्रकथनं नाम पञ्चमः पटलः ।

॥ अथ षष्ठः पटलः ॥

पाठीननेत्रां[1] परिपूर्णवक्त्रां[2] पञ्चेन्द्रियस्तम्भनचित्तरूपाम् ।
पीताम्बराढ्यां पिशितासनां[3] सदा भजामि संस्तम्भनकारिणीं सदा ॥१॥

क्रौञ्चभेदन उवाच—

नमस्ते योगिसंसेव्य नमः कारुणिकोत्तम ।
एकाक्षरीमहामन्त्रप्रयोगं[4] वद शङ्कर ॥२॥

ईश्वर उवाच—

उत्तमं कुण्डहोमञ्च स्थण्डिलञ्चैव मध्यमम्[5] ।
स्थण्डिलेन विना होमं निष्फलं भवति ध्रुवम ॥३॥

षट्कोणं चाष्टकोणञ्च चतुष्कोणं कुमारक
त्रिविधं स्थण्डिलं चैव वक्ष्येऽहं कुरु आदर ॥४॥

लक्ष्मी(:)शान्तिस्तथा पुष्टिर्विघ्नाविघ्ननिवारणैः[6] ।
चतुरस्रे हुनेत्कुण्डे तन्त्रवित् परिशोधिते ॥५॥

वशीकरणसम्मोहे वाणिज्ये द्रव्यसंग्रहे ।
कीर्त्तिकामस्तु जुहुयाद्भगाकारे च कुण्डके[7] ॥६॥

दशेन्द्रियस्तंभने तु दिव्यैर्गन्धैस्तथैव च ।
त्रिकोणकुण्डे जुहुयाद् गुरुमार्गेण बुद्धिमान् ॥७॥

विद्वेषणे तु जुहुयाद्वर्त्तुले कुण्डमध्यमे[8] ।
उच्चाटने तु जुहुयात् षट्कोणाख्ये तु[9] कुण्डके ॥८॥

मारणे चाष्टकोणे तु कतत्तत्कर्मानुसारतः[10] ।
तत्तद्द्रव्येण जुहुयात्तत्तद्ग्रन्थोक्तमेव च ॥९॥

वक्ष्येऽहं स्थण्डिलैर्होमं[11] षट्कर्मसु[12] कुमारक ।
जुहुयाच्छान्तिवश्येषु स्थण्डिले चतुरस्रके ॥१०॥

विद्वेषणे स्तम्भने च जुहुयादष्टकोणके ।
मारणोच्चाटने पुत्र षट्कोणेषु विधीयते ॥११॥

---

१. ग. पाटिन नेत्रां । घ. भालेन नेत्रां । २. घ. ०गात्रां । ३. ख. ग. पिशिताशनां । घ. पिशिनीं । ४. ग. घ. ०महामंत्रं० । ५. घ. स्थंडिलं मध्यमं तथा । ६. ग. घ. विद्या विघ्न० । ७. क. कुण्डले । ८. घ. कुण्डमध्यगे । ९. घ. च । १०. ग. तत्तत्कामा० ११. ख. घ. स्थंडिले होमं । १२. ख. ग. षट्कर्मेषु ।

प्रादेशं शतहोमे च[1] अरत्निश्च सहस्रके ।
हस्तं चायुतहोमेषु[2] द्विहस्तं लक्षहोमके ॥१२॥

गुणहस्तं कोटिहोमे[3] कुण्डं निम्नोन्नतं सुत[4] ।
स्थण्डिलस्य च[5] वक्ष्यामि तान्त्रिकोक्तस्य लक्षणम् ॥१३॥

अरत्निर्हस्तमात्रं च द्विरत्निश्च द्विहस्तयोः[6] ।
शतं सहस्रमयुतं लक्षहोमेष्वयं क्रमः ॥१४॥

सर्वत्रैवोन्नतं पुत्र प्रादेशं स्थण्डिलक्रमम्[7] ।
लक्षणं[8] स्थण्डिलैः[9] कुण्डै[10]र्न ज्ञात्वा निष्फलं हुतम् ॥१५॥

शान्तिवश्यस्तम्भनानि विद्वेषोच्चाटनं तथा ।
मारणान्तानि शंसन्ति षट्कर्माणि मनीषिणः ॥१६॥

नानारोगैः कृत्रिमैश्च नानाचेटकमेव च ।
विषभूतप्रयोगेषु निरासः[11] शान्तिरुच्यते[12] ॥१७॥

वश्यं जनानां सर्वेषां वात्सल्यं हृद्गतं स्मृतम् ।
स्तम्भनं रोधनं पुत्र सर्वकर्मसु निष्फलम्[13] ॥१८॥
मैत्रस्य[14] कलहोत्पत्तिर्विद्वेषणमुदाहृतम्[15] ।
चलबुद्धिभ्रमेणोक्तमुच्चाटनमिदम्भुवि ॥१९॥

प्राणिनां प्राणहरणं मारणं समुदाहृतम् ।
प्रत्येकमेषां वक्ष्यामि होमयोगं सुनिश्चितम् ॥२०॥

दूर्वाहोमं त्रिमध्वक्तं जुहुयादयुतत्रयम् ।
रोगहन्ता[16] ग्रहादिभ्यः सद्यः शान्तिकरं भवेत् ।२१॥

सुमन्त-[17] कुसुमैराज्यं[18] कृतं बाणायुतं तथा ।
जुहुयान्निशि काले च वश्यं सम्मोहनं[19] भवेत् ॥२२॥

बिभीतकसमिद्भिर्वा करञ्जैर्बीजमेव च ।
नेत्रायुतं हुनेत्पुत्र स्तम्भनं परमं मतम्[20] ॥२३॥

---

१. घ. तु । २. घ. चायुतहोमे तु । ३. घ. कोटिहोमं । ४. घ. तथा । ५. ग. प्र । ६. ख. द्विहस्तकम् । ७. घ. स्थण्डिलं क्रमात् । ८. ख. लक्षणैः । ९. ख. स्थंडिलं । घ. स्थंडिले । १०. ख. कुण्डं । ११. क. घ. निराशः । १२. क. ०मुच्यते । १३. घ. निश्चितम् । १४. ख. मित्रस्य । १५. ख. ०विद्वेषं च मुदा० । १६. ख. रोगकृत्वा । १७. ख. स्यमन्त । घ. शामंत । १८. घ. राज्यैः । १९. घ. मोहनकं । २०. घ. परम् ।

निम्बार्कपत्रहोमेन निम्बतैलेन मिश्रितम् ।
नेत्रायुतेन विद्वेषं भवेत्पाषाणयोरपि ॥२४॥
उलूककाकयोः पत्रैर्बाणायुतमखण्डिभिः ।
जुहुयाच्च ततो रात्रौ भवेदुच्चाटनं सुत ॥२५॥
तिलतैलसमायुक्तं[1] शाल्मलीकुसुमं[2] तथा ।
लक्षमेकं हुनेद्रात्रौ प्रेताग्नौ प्रेतकानने ॥२६॥
नग्नः प्रेतमुखे[3] भौमे[4] प्रेतकाष्ठेन[5] बुद्धिमान् ।
मृकण्डुसदृशं[6] चैव मारणं भवति ध्रुवम् ॥२७॥

इति षड्विद्यागमे सांख्यायनतन्त्रे षष्ठं पटलम्[7] ॥६॥

॥ अथ सप्तमः पटलः ॥

पीताम्बरधरां देवीं पूर्णचन्द्रनिभाननाम् ।
वामे जिह्वां गदां चान्य धारयन्तीं भजाम्यहम् ॥१॥

क्रौञ्चभेदन उवाच—

महापाशुपताक्रान्त नमः पन्नगभूषण[8] ।
षट्त्रिंशदक्षरी विद्या[9] बगलापाशमेव च[10] ॥२॥

ईश्वर उवाच—

मन्त्रोद्धारं प्रवक्ष्यामि पुरश्चरणलक्षणम् ।
प्रयोगं चोपसंहारं शान्ति तच्छृणु पुत्रक[11] ॥३॥
तारं च बगलाबीजं बगलापदमुच्चरेत् ।
मुखीति पदमुच्चार्य सर्वशब्दं ततोच्चरेत् ॥४॥
दुष्टानां पदमुच्चार्य वाचं[12] मुखं पदं[13] वदेत् ।
स्तम्भयेति पदं चोक्त्वा जिह्वां कीलय उच्चरेत्[14] ॥५॥
बुद्धिशब्दं ततोच्चार्य विनाशय[15] ततो[16] वदेत् ।
स्थिरमायां[17] ततोच्चार्य प्रणवं च ततोच्चरेत् ॥६॥

---

१. घ. तिलतैलेन संयुक्तं । २. ग. शाल्मिली० । ३. घ. प्रेतमुखं । ४. क. ग्नौ मे । घ. भौमेः । ५. घ. प्रेतकाष्ठे च । ६. ख. मृकण्ड० । घ. मृकुण्डसदृशे । ७. घ. ०एकाक्षरीषट्प्रयोगकथनं नाम षष्ठः पटलः ॥ ८. ख. ०भूषणम् । ९. ख, ग. षट्त्रिंशक्षदरीं-विद्यां । १०. ख. वगलां तां च मे वद । ग. वगलायाश्च मे वद । घ. वगलायाश्च देवता । ११. घ. साम्प्रतं शृणु पुत्रक । १२. ख. वाचे । १३. ग. पदे । १४. घ. कीलयमुच्चरेत् । १५. ग. विनाशयेति । घ. विनाशाय । १६. घ. पदं । १७. घ. स्तब्धमायां ।

वह्निजायां समुच्चार्य्य एवं मन्त्रं समुद्धरेत् ।
षट्त्रिंशदक्षरं मन्त्रं मन्त्रराजमिदं भुवि ॥७॥

न्यासविद्यां प्रवक्ष्यामि सदा सिद्धिकरीं पराम् ।
बगलामातृकां चादौ कामतार्तीयवाग्भवम् ॥८॥

श्रीमायामातृकां चैव बगलापञ्जरं न्यसेत् ।
लघुषोढां च विन्यस्य सर्वमन्त्रेष्वयं क्रमः ॥९॥

ध्यानं यत्नात्प्रवक्ष्यामि ध्यानं सर्वार्थसिद्धिदम्[1] ।
आदौ मध्ये तथा चान्ते ध्यानं सर्वार्थसिद्धिदम् ॥१०॥

चतुर्भुजां त्रिनयनां कमलासनसंस्थिताम् ।
त्रिशूलं पानपात्रं च गदां जिह्वां च बिभ्रतीम् ॥११॥

बिम्बोष्ठीं कम्बुकण्ठीं च समपीनपयोधराम् ।
पीताम्बरां मदाघूर्णां ध्यायेद् ब्रह्मास्त्रदेवताम् ॥१२॥

नारदो ऋषिरेवात्र बृहतीच्छन्द एव च ।
देवता बगला नाम स्तम्भनास्तंभचिन्मयीम्[2] ॥१३॥

लँ बीजं चैव ह्रँ शक्तिः ईं[3] कीलकमुदाहृतम् ।
शत्रूणां स्तम्भनार्थञ्च जपेऽहं[4] विधिपूर्वकम् ॥१४॥

सङ्कल्पपूर्वकं मन्त्रं कौलचक्रक्रमेण च ।
पृथ्वीलक्षं जपेन्मन्त्रं न्यासध्यानसमन्वितम् ॥१५॥

तर्प्पयेत्तद्दशांशंच हेतुमिश्रेण[5] वारिणा ।
जुहुयाद्बिल्वकुसुमं[6] तद्दशांशं च बुद्धिमान् ॥१६॥
ब्राह्मणान् भोजयेत्पश्चात्तद्दशांशं घृतप्लुतम् ।
तर्पयेत्[7] तर्पयामीति स्वाहान्तं होममाचरेत् ॥१७॥

पूजा त्रैकालिकी नित्यं जपस्तर्पणमेव[8] च ।
होमो[9] ब्राह्मणभुक्तिश्च पुरश्चरणमुच्यते ॥१८॥
पुरश्चर्यां[10] विना मंत्रं न प्रसिद्ध्यति[11] भूतले ।
एवं स्वाधीनमन्त्रेण[12] षट्प्रयोगान् समाचरेत् ॥१९॥

---

१. ख. सर्बकामार्थसिद्धिदम् । २. ख. स्तंभनास्त्रे च चिन्मयीं । ग. घ. स्तंभनास्त्र च चिन्मयीं । ३. ग. रँ । ४. घ. जपेयं । ५. घ. हेतुसंमिश्र । ६. ग. विल्वकसुमैः । ७, घ. तर्पणे । ८. ग. घ. जपतर्पं० । ९. घ. होम । १०. ध. पुरश्चर्या । ११. घ. सा सिद्धयति । १२. घ. साधितमन्त्रेण ।

शान्त्याद्यं (न्त्यर्थं) जुहुयाच्छालिसक्तुराज्यसमन्वितम्[१] ।
गुणायुतं हुते[२] धीमान् कुण्डे पूर्वोक्तमादरात् ॥२०॥
वशीकरणकार्येषु विल्वपत्रं घृतप्लुतम्[३] ।
गुणायुतं चामलकप्रमाणं क्रौञ्चभेदन[४] ॥२१॥
स्तम्भनेषु[५] हुनेद्धीमान् तालकं घृतसम्प्लुतम् ।
बदरीफलमात्रं तु गुणायुतमनन्यधीः ॥२२॥
विद्वेषणे च जुहुयात्पत्रैर्निम्बार्कसंयुतैः[६] ।
रात्रौ वेदायुतं धीमान् सद्यो विद्वेषणं परम्[७] ॥२३॥
राजीलवणसंयुक्तं बाणायुतमनन्यधीः ।
तस्य[८] चोच्चाटनं[९] शीघ्रं ध्रुवकूर्मादयोरपि[१०] ॥२४॥
तलतैलेन संयुक्तं माषहोमं गुणायुतम् ।
प्रेताग्नौ प्रेतकाष्ठं[११] च जुहुयात्प्रेतकानने ॥२५॥
भौमवारे निशा[१२] नग्नो जुहुयात्प्रेत उल्मुके[१३] ।
सद्यो मारणमाप्नोति मृकण्डुसदृशोऽपि च[१४] ॥२६॥

॥ इति षड्विद्यागमे सांख्यायनतन्त्रे सप्तमं पटलम्[१५] ॥

॥ अथाष्टमः पटलः ॥

बिम्बोष्ठीं चारुवदनां समपीनपयोधराम् ।
पानपात्रं वैरिजिह्वां धारयन्तीं शिवां भजे ॥१॥

क्रौञ्चभेदन उवाच—

नमः कौलागमाचार्य वेदवेदाङ्गपारग ।
बगलामन्त्रराजस्य प्रयोगं वद शङ्कर ॥२॥

ईश्वर उवाच—

राजीलवणमादाय मूलमन्त्रेण पुत्रक ।
ग्रस्तं कृत्वा साध्यनाम जुहुयादयुतं निशि ॥३॥

---

१. ख. ०शक्तुमाज्य० । २. ख. ग. घ. हुनेद् । ३. ख. घृतप्लुते । ४. घ. पुस्तके पद्यमिदं नास्ति । ५. ख. स्तंभने सु । घ. स्तंभने तु । ६. ख. घ. ०निम्बार्कसंभवैः । ७. ख. ग. घ. भवेत् । ८. घ. सद्य । ९. ग. उच्चाटनं । घ. मुच्चाटनं । १०. ख. ध्रुवं कूर्मा० । घ. ध्रुवकर्मा० । ११. ख. प्रेतकाष्ठे । १२. ख. निशी । ग. घ. निशां । १३. ख. गोल्मुके । घ. दिङ्मुखे । १४. घ. वा । १५. घ. मंत्रराजकथनं नाम सप्तमः पटलः ।

नानारोगहरं चैव नानाभूतनिकृन्तनम् ।
नानाकृत्रिमनाशञ्च भवेत्सत्यं न संशयः ॥४॥

हरिद्राखण्डहोमेन अयुतेन कुमारक ।
वशीकरणसम्मोहं भवेच्छङ्करभाषणम् ॥५॥
तालकेन हुनेद्रात्रौ नेत्रायुतमनन्यधीः ।
नानास्तम्भनमार्गेषु सत्यमेतन्न संशयः ॥६॥

खरस्य[1] रक्तमादाय जातिकर्म्मविरोधिनाम् ।
निम्बार्कपत्रमादाय प्रत्येकं नाम चालिखेत् ॥७॥

प्रेताग्नौ प्रेतकाष्ठे च नग्ने च[2] प्रेतदिङ्मुखे[3] ।
हुनेत्प्रेतवने धीमानयुतं द्वेषकारकम् ॥८॥

अनाथस्य चितौ रात्रौ शत्रुप्रकृतिं लिखेत् ।
हृदये नाम आलिख्य[4] मारयेति ललाटके ॥९॥

दहयुग्मं लिखेद् बाहौ ऊर्वोस्तस्य[5] कुरुद्वयम् ।
एवं च विलिखेत्सम्यक् सशत्रोर्वर्णमादरात्[6] ॥१०॥

ताडयेद् हृदये[7] मन्त्री शतमष्टोत्तरं जपेत् ।
तद्भस्म संग्रहे[8] धीमान् गोपयेन्नगराद्बहिः[9] ॥११॥

पुनर्भौमनिशाकाले मन्त्रयेन्मूलमन्त्रतः ।
अष्टोत्तरसहस्रं च शत्रुमूर्द्धनि[10] विनिःक्षिपेत्[11] ॥१२॥

स शत्रुः सप्तरात्रेण म्रियते नात्र संशयः ।
उष्ट्रारूढं रिपुं ध्यात्वाग्रस्य दण्डेन[12] मन्त्रयेत्[13] ॥१३॥
निःक्षिपेत्सप्तरात्रं तु सप्तधा मन्त्रितं[14] तथा ।
उच्चाटनं भवेत्सत्यं शिवस्य वचनं यथा[15] ॥१४॥
प्रेतभस्म रवौ[16] ग्राह्यं बगलामंत्रराजतः ।
सहस्रं मन्त्रयेच्छत्रो[17] रात्रौ[18] नग्नो न[19] भौमके ॥१५॥

---

१. ग. घ. वाराह । २. ख. नग्नश्च । घ. नग्नो वा । ३. ख. घ. प्रेतदिङ्मुख । ४. ग. घ. मालिख्य । ५. ख. ऊर्वोर्भस्मं । घ. ऊर्वोर्भस्म । ६. ख. स्वशत्रो० । घ. शत्रोर्वर्णसमादरात् । ७. ग. घ. गदया । ८. ख. ग. घ. संग्रहेद् । ९. घ. रोपयेन्न० । १०. घ. शत्रोर्मूर्धनि । ११. घ. निक्षिपेत् । १२. ख. ग्रस्थदण्डेन । घ. ग्रस्तं कृत्वा तु । १३. घ. मंत्रवित् । १४. ख. मंत्रिते । १५. घ. तथा । १६. क. वशौ । १७. ख. भस्म । घ. रात्रौ । १८. घ. मंत्री । १९. ख. नग्नोऽथ । ग. घ. नग्नेन ।

खाने पाने च तद्भस्म दातव्यं शत्रुमण्डले ।
वाक्पाणिपादपायुश्च[1] नेत्रश्रोत्रमतिस्तथा ॥१६॥
स्तंभनं च भवेच्छीघ्रं बृहस्पतिसमोऽपि च[2] ।
किम्पुनर्मानवादीनां स्तंभनं[3] क्रौञ्चभेदन ॥१७॥
क्षुद्रप्रयोजनैः[4] पुत्र न कर्त्तव्यं कदाचन ।
अज्ञानात्कुरुते यस्तु देवताशापमाप्नुयात् ॥१८॥
ग्रस्तं कृत्वा वैरिनाम विलिखेत्तालपत्रके ।
निशाकाले चार्कवारे निर्दहेद्दीपवह्निना ॥१९॥
कुबेरसदृशः श्रीमान् मासमात्रेण पुत्रक ।
मन्दबुद्धिर्दरिद्रोऽपि जायते भुवि पुत्रक ॥२०॥
चितिवस्त्रं रवौ ग्राह्यं तदङ्गारं रवौ पुनः ।
चितिकाष्ठं रवौ ग्राह्यं रवौ कुर्यात्स लेखिनीम् ॥२१॥
रवौ रात्रौ च संलिख्य शत्रुनाम[5] च तत्पटे ।
वेष्टयेद् बगलाबीजं मूलमंत्रं ततो लिखेत् ॥२२॥
वह्निबीजेन संवेष्ट्य वेष्टयेज्जीवनीमनुः[6] ।
तद्वस्त्रगुलिकां[7] कृत्वा वेष्टयेत् श्वेतरज्जुना[8] ॥२३॥
स्थापयेच्च कपाले तु निशि भौमे च[9] चर्चिते[10] ।
प्रादेशगर्त्तं कृत्वाथ श्मशाने[11] च सुबुद्धिमान् ॥२४॥
रवौ रात्रौ च[12] निःक्षिप्य पूरयेद्भस्म सादरात्[13] ।
तत्र नग्नो[14] जपं कुर्यादयुतं मूलविद्यया ॥२५॥
मन्दाग्निर्मन्दबुद्धिश्च[15] नेत्रश्रोत्रेषु[16] मन्दताम्[17] ।
पाणिपादौ[18] च मन्दत्वं निर्वीर्यो भवति ध्रुवम् ॥२६॥
एवं रोगसमायुक्तो मण्डलाद्रिपुनाशनम् ।
चन्द्रप्रस्तारमंत्रेण द्रव्यतर्प्पणमाचरेत् ॥२७॥

---

१. घ. पायूंश्च । २. घ. वा । ३. ग. सुगमं । ४. ०ख. घ.०प्रयोजने । ५. घ, रिपोर्नाम । ६. ख. ०जीवनो० । ७. घ. तद्वस्त्रं गुटिकां । ८. ख. प्रेतरज्जुना । ९. ख. घ. भौमेन । १०. घ. चार्चयेत् । ११. ग. स्मशाने तु । १२. ख. पि । १३. घ. मादरात् । १४. घ. नग्ने । १५. ग. मंत्राग्नि० । १६. घ. नेत्रश्रोत्रे च । १७. घ. मन्दता । १८. ख. पाणौ पादे ।

शतं सहस्रमयुतं कार्यलाघवगौरवात् ।
तत्तर्पणासवं[1] पीत्वा[2] प्रयोगं शान्तिमाप्नुयात् ॥२८॥
न कर्तव्यं मुमुक्षैश्च[3] परपीडां कदाचन ।
प्राणैः कण्ठगतैः कुर्यात् पश्चात् संस्कारमाचरेत् ॥२९॥

इति षड्विद्यागमे सांख्यायनतन्त्रे अष्टमं पटलम्[4] ॥८॥

॥ अथ नवमः पटलः ॥

पीताम्बरालङ्कृतपीतवर्णां शातोदरी[5] शर्वमुखामृतार्चिताम्[6] ।
पीनस्तनालङ्कृतपीतपुष्पां सदा स्मरेयं बगलामुखीं हृदि ॥१॥

क्रौंचभेदन उवाच—

नमोऽस्तु मंत्रागमकोविदाय श्रीनीलकण्ठाय नमो नमस्ते ।
एतन्मनोर्यन्त्रमखण्डतेजसे[7] प्रयोगमूलं वद चन्द्रचूड ॥२॥

ईश्वर उवाच—

यन्त्रप्रयोगं यमशासने[8] कलौ यन्त्रप्रयोगं यमिनां च दुर्लभम् ।
यन्त्रप्रयोगं यतयस्तु कुर्वतां[9] यज्ञाद्धि[10]गोविप्रयतेश्च[11]रक्षणे ॥३॥

बिन्दुं[12] त्रिकोणं वृत्तं च अष्टकोणं ततोपरि ।
ततोपरि लिखेत्पुत्र षट्कोणं वृत्तमादरात् ॥४॥
ततोपरि लिखेत्सम्यक् भूपुरद्वयमादरात्[13] ।
बिन्दुमध्ये लिखे[14]त्कोणत्रितये[15] त्रितयं[16] त्रिधा ॥५॥
अष्टकोणेषु[17] विलिखेद् गायत्रीं बगलाह्वयाम् ।
षट्कोणेषु[18] सुसंलिख्य[19] विद्यां षट्त्रिंशदक्षरीम् ॥६॥
वृत्तेषु[20] विलिखेत्पुत्र पञ्चाशद्वर्णमादरात् ।
भूपुरेषु च संलिख्य प्राणस्थापनकं मनुम्[21] ॥७॥

---

१. ख. तत्तर्पणाम्भः । २. ख. संपीत्वा । ३. ख. मुमुक्षेश्च ४. ०अष्टमः पटलः । ५. ख. शान्तोदरीं । ६. ख. थ. शर्वमुखामरा० । ७. क, ख. ग. येतन्मनोर्यंत्रमखण्डतेक्ष । ८ घ. यमशासनं । ९. घ. कुर्वन् । १०. ख. घ. यज्ञादि । ११. घ. ०यतश्च । १२. ख. घ. यिन्दु । ग. बिन्दु; । १३. ख. ग. घ. पुस्तकेष्वयमंशो विशेषः—

"बिन्दुमध्ये लिखेद्बीजं बगलायाश्च पुत्रक ।
साध्यं तद्बीजगर्भं (मध्य. घ.) स्थं कुर्यात् सम्यक् सुबुद्धिमान् ॥

१४. क. ख. ग. तद्बीजं विविखेत् । १५. घ. त्रितयेषु । १६. घ. त्रिधा । १७. घ. अष्ट. पत्रेषु । १८. षट्कोणके । १९. ख. घ. च संलिख्य । २०. घ. वृत्ते तु । २१. घ. मनुः ।

रजते स्वर्णपट्टे वा प्रादेशं चतुरस्रके ।
लेखिन्या स्वर्णमय्या[1] च लिखेद्भार्गववासरे ॥८॥

पूजायंत्रमिदं पुत्र पूजनात् सर्वसिद्धिदम् ।
पूजाविधिं प्रवक्ष्यामि मुनिगुह्यं सुपावनम् ॥९॥

मूलमन्त्रेण सम्पूज्य उपचारैश्च षोडशैः ।
शुद्धप्रदेशजां दूर्वां निर्मलां च सुकोमलाम् ॥१०॥

संग्रहेत्क्षालयेत् सम्यक् मंत्रराजेन पुत्रक ।
मन्त्रान्ते च नमः[2] पूर्वं[3] निःक्षिपेद् दूर्वमादरात्[4] ॥११॥

एवं भूतसहस्रं च पूजयेच्च दिने दिने ।
मण्डलाद्व्याधयः[5] सर्वे[6] मुच्यन्ते कृत्रिमादयः ॥१२॥

भूतप्रेतपिशाचाद्याः क्रूराः खेचरभूचराः ।
पूजनान्नाशमाप्नोति शिवस्य वचनं यथा ॥१३॥

अर्चयेत्पूर्ववद्यन्त्रमुपचारैश्च षोडशैः ।
संग्रहेद्रक्तकुसुमं[7] हयारिं च सुनिर्मलम् ॥१४॥

तेन पूजा प्रकर्त्तव्या[8] पूर्ववन्मण्डलं सुधीः ।
सम्मोहनं च वश्यञ्च द्रव्यलाभं भवेद्ध्रुवम् ॥१५॥

बिभीतकोद्भवं पुष्पमाहरेद्भौमवासरे ।
पूजयेत्पूर्ववत्पुत्र नानास्तम्भनकर्मणि ॥१६॥

निम्बार्ककुसुमेनाथ[9] यन्त्रं वापि[10] कुमारक ।
पूर्ववत्पूजयेन्मन्त्री[11] सद्यो विद्वेषणं भवेत् ॥१७॥

धत्तूरकुसुमेनैव पूर्ववत्पूजयेत्सुत ।
उच्चाटनं भवेत्सत्यं नान्यथा शिवभाषणम् ॥१८॥

विषतिन्दुकपुष्पेण पूर्ववत्सम्यगर्चयेत् ।
सद्यो विनाशमाप्नोति[12] मृकण्डुसदृशो[13] रिपुः ॥१९॥

---

१. ख. स्वर्णमय्याः । २. ग. पुनः । ३. ख. पूर्वां । ४. घ. क्षिपेद्दूर्वां समादरात् । ५. घ. ०दामयाः । ६. ख. सर्वा । ७. क. संग्रहे प्रकुसुमं । ८. घ. प्रकर्त्तव्यं । ९. घ. ०चाथ । १०. घ. पुत्रेणाथ । ११. घ. ०पूजयन् । १२. ख. विनाशमायाति । घ. नाशमवाप्नोति १३. घ. मृकुण्ड० ।

शमन्तकुसुमेनैव[1] पूर्ववत्पूजयेन्नरः ।
पूर्ववज्जायते[2] लोके वेदशास्त्रार्थकोविदः ॥२०॥

पलाशकुसुमेनैव पूर्ववत्पूजयेन्नरः ।
सद्यो मन्दो भवेद्वाग्मी लभेत्सर्वज्ञतां सुत ॥२१॥

पूर्ववत्पूजयेत् पुत्र अशोककुसुमेन च ।
ईप्सितां[3] लभते[4] कन्यां सा तु पुत्रवती भवेत् ॥२२॥

तुलसीमञ्जरीभिश्च पूर्ववत्पूजयेन्नरः ।
ज्ञानभक्तिश्च वैराग्यं लभते[5] तरलैरपि[6] ॥२३॥

नन्दावर्त्तेन[7] सम्पूज्य वातरोगं व्यपोहति ।
मल्लिकाकुसुमेनैव पूजयेज्ज्वरशान्तये ॥२४॥

कुसुमैश्चम्पकैरर्च्य[8] शीतज्वरनिवारणम् ।
अर्चयेज्जातिकुसुमैर्महरोगं[9] विनश्यति ॥२५॥

वन्यैश्च मल्लिकापुष्पैर्निःक्षेपं[10] लभते ध्रुवम् ।
केतकीकुसुमेनार्च्य द्रव्यवान् जायते ध्रुवम् ॥२६॥

एवं च पूजयेद्यन्त्रं न जपैर्न च होमतः ।
प्रयोगसिद्धिर्भवति बगलायाः प्रसादतः ॥२७॥

इति षड्विद्यागमे सांख्यायनतन्त्रे नवमं पटलम्[11] ॥९॥

॥ अथ दशमः पटलः ॥

कम्बुकण्ठीसुताम्रोष्ठीं[12] मदविह्वललोचनाम् ।
भजेऽहं बगलां देवीं पीताम्बरधरां शुभाम् ॥१॥

क्रौञ्चभेदन उवाच—

अष्टमूर्त्ते महामूर्त्ते नमस्ते चन्द्रशेखर ।
वद प्रयोगं मंत्रस्य[13] लेपनक्रममादरात्[14] ॥२॥

ईश्वर उवाच—

पूर्वोक्तं यन्त्रमालिख्य[15] प्राणस्थापनपूर्वकम् ।
अर्चयेदुपचारेण[16] चन्दनेन विलेपयेत् ॥३॥

---

१. घ. स्यमन्त । २. ग. पुत्रवान्० । घ. पुत्रं बा० । ३. घ. ईप्सितां च । ४. घ. लभेत् । ५. ग. लभ्यते । ६. घ. च परैरपि । ७. ख. नन्दावर्त्तैव । नन्द्यावर्त्तैश्च । घ. नंद्यावर्त्तेन । ८. घ. ०रर्चेत् । ९. ग. महारोगं । १०. घ. निक्षिप्त । ११. घ. ०यंत्रप्रयोगं नाम नवमः पटलः । १२. ख.ग. कम्बुकण्ठीं० । १३. घ. यन्त्रस्य । १४. घ. लेपनं० । १५. घ. ०मालिख्यं । १६. घ. ०दुपचारैश्च ।

बाणायुतं जपेद्धीमान् नित्यपूजासमन्वितम् ।
राज्यसिद्धिर्भवेत्सत्यमयत्नेन[1] कुमारक ॥४॥

कस्तूरीलेपनं कुर्यात्सम्यगर्चितयन्त्रके ।
नित्यं बाणसहस्रं च[2] न्यासध्यानसमन्वितम् ॥५॥

मण्डलद्वययोगेन रोगकृत्याग्रहादयः ।
तत्क्षणान्नाशमायान्ति[3] तमः सूर्योदये[4] यथा[5] ॥६॥

पूर्तिं चार्द्धपलं[6] नित्यं लेपयेद्यन्त्रमादरात् ।
जपं कुर्यात्पूर्ववच्च मासं वा मण्डलं तु वा ॥७॥

वशीकरं तु सम्मोहं द्रव्यसंग्रहमेव च ।
भवत्येव न सन्देहो नात्र कार्या विचारणा ॥८॥

हरिद्रातालकं चैव अर्कक्षीरेण मर्द्दितम्[7] ।
त्रिकालं लेपयेन्नित्यं त्रिसहस्रं जपेद्दिने ॥९॥

महास्तंभनमाप्नोति[8] कर्णाक्षिवाक्पतिस्तुवा[9] ।
मण्डलान्नगरं[10] ग्रामं रणसम्मोहमेव च[11] ॥१०॥

सर्षपास्त्रिकदूर्वैश्च[12] दुग्धैर्वज्रार्कसम्भवैः ।
क्षारेण[13] मर्दयेत्सम्यक् यन्त्रलेपनमाचरेत् ॥११॥

कृत्वार्धमण्डलं चैव षट्सहस्रं दिने दिने ।
विद्वेषणं भवेत्सिद्धं शिवस्य वचनं यथा ॥१२॥

धत्तूरं तिन्दुकं[14] बीजं तालकेन समन्वितम् ।
निम्बपत्रद्रवेनैव मर्दयेल्लेपयेत्त्रिधा ॥१३॥

एवं मासप्रयोगेण नगरं ग्राममेव च ।
रणे[15] वा राजगेहे[16] वा शीघ्रमुच्चाटनं भवेत् ॥१४॥

प्रेतान्नं प्रेतभस्मं[17] च प्रेताङ्गारं समं समम् ।
अर्कवज्रीमयं[18] क्षीरं खल्वेनैव[19] तु मर्दयेत् ॥१५॥

---

१. क. ०मयनेन । २. घ. तु । ३. घ. ०माप्नोति । ४. घ. सूर्योदयः । ५. घ. तथा । ६. ख. भूचिन्तार्थं फलं । ७. घ. मर्द्दयेत् । ८. घ. पक्ष्यात् । ९. ख. कर्णाक्षिवाक्युतिस्तु । घ. कर्णाक्षी वाङ्मतिस्तु । १०. घ. नगरे । ११. घ. वा । १२. ख. सर्षपास्त्रिकट्वर्कैश्च । ग. सर्षपास्त्रिकडुवैर्वा । घ. सर्षपां त्रिकदुश्चैव । १३. ग. क्षीरेण । घ. खल्वेन । १४. घ. नितिंदुबकं । १५. घ. रणं । १६. घ. राजगेहं । १७. ख. प्रेतभूति । १८. ग. अर्कवज्रमयी । घ. अर्कवज्रमयं । १९. क. खलेनैव ।

त्रिकालं लेपनं कुर्यात् प्रीतये होमयुक्तिना[१] ।
नित्यं[२] ऋतुसहस्रं[३] तु मन्त्रराजमिमं[४] जपेत् ॥१६॥

पक्षान्मारणमाप्नोति नात्र कार्या विचारणा ।
अथवा निम्बतैलेन तद्वत्कृत्वा तु मारणम् ॥१७॥

तिलतैलेन संयुक्तं मर्दयेद् गरमादरात्[५] ।
यन्त्रस्य लेपनं कुर्यात् त्रिकालं मूलविद्यया ॥१८॥

सन्तपेद्दीपशिखया पक्षमेकं कुमारक ।
मारणं च भवेन्नित्यं नात्र कार्या विचारणा ॥१९॥

वज्रीक्षीरं[६] त्रिकालं तु पूर्ववल्लेखनेषु[७] च ।
तापज्वरस्य पीडायां षण्मासाद्रिपुमारणम् ॥२०॥

पूर्ववल्लेपनं चैव जपसन्तर्पणं[८] तथा ।
त्रिसप्तदिनमात्रेण मारणं चोरगोरगैः[९] ॥२१॥

धत्तूरद्रवसंयुक्तं मर्दयेत्सर्षपं तथा ।
जपलेपनयोः[१०] पुत्र गुल्मरोगी भवेद्रिपुः ॥२२॥

निम्बपत्रद्रवं चैव विषकण्टकजं[११] तथा ।
विषतिन्दुकजं चैव त्रिविधं च समं समम् ॥२३॥

त्रिकाललेपनं[१२] कुर्यात् षट्सहस्रं[१३] मनुं जपेत् ।
पक्षेण[१४] द्वादशाहेन[१५] मारणं च समं समम्[१६] ॥२४॥

त्रिकालं लेपनं कुर्यात् षट्सहस्रं मनुं जपेत् ।[१७]
मर्द्दयेदारनालेन मारिचं त्रिफलां तथा ॥२५॥

त्रिकालं लेपनं कुर्यात्[१८] त्रिकालं जपमाचरेत् ।
करपादादिदाहेन[१९] मण्डलाच्छत्रुमारणम्[२०] ॥२६॥

---

१. घ. सन्तपेद्दीपवह्निना । २. घ. निसं । ३. घ. क्रतु० । ४. घ. ०मिदं । ५. घ. ०रलवमा० । ६. घ. वज्रक्षीरं । ७. घ. ०लेपनेन च । ८. ग. जपः० । ९. घ. वैरिकैर्गृहः । ग. चोरगोरजैः । १०. ख. यंत्रलेपनयोः । घ. जपलेपनया । ११. ग. ०कण्टककं । १२. ख. घ. त्रिकालं० । १३. क. सहस्रं । १४. घ. पक्षाद्वा । १५. घ. द्वादशाहं वा । १६. ख. ग. घ. न संशयः । १७. पादद्वयं पुस्तकान्तरेषु नास्ति । १८. घ. कृत्वा । १९. क. करपाद्यपि० । ग. करपादावि । घ. करपाददहेनैव । २०. क. ०तारणम् ।

गोमयैर्लेपनं[1] दत्वा गुल्मरोगी भवेद्रिपुः ।
गोमूत्रं छागमूत्रं च मिश्रितं पूर्ववत्तथा ॥२७॥
पित्तरोगी[2] भवेच्छत्रुरर्द्धमण्डलमात्रतः ।
लेपनं छागरक्तेन भ्रान्तान्पैत्ति[3] भवेद् ध्रुवम् ॥२८॥
मत्कुणस्य च रक्तेन उन्मादी जायते रिपुः ॥

॥ इतिषड्विद्यागमे सांख्यायनतन्त्रे दशमं पटलम्[4] ॥१०॥

॥ अथैकादशः पटलः ॥

नमस्ते वगलादेवीमासवप्रियभामिनीम्[5] ।
भे(भ)जेऽहं स्तम्भनार्थं च गदां जिह्वां च बिभ्रतीम्[6] ॥१॥

क्रौञ्चभेदन उवाच—

नमस्ते मौलिसंसेव्य[7] नमः पन्नगभूषण[8] ।
तर्पणेन[9] प्रयोगं च वद मे करुणाकर ॥२॥

ईश्वर उवाच—

पूजयेद्यन्त्रराजं च उपचारैश्च षोडशैः ।
तद्यंत्रोपरि सन्तर्प्य तर्प्पणस्य विधिं शृणु ॥३॥
गुडोदकैस्तर्पणं च कुर्यात्पंचायुतं तथा ।
शान्तिकृत्यं भवेच्छीघ्रं नात्र कार्या विचारणा ॥४॥
द्रवेण[10] तर्पणं कुर्यात् पूर्वसंख्यासु पुत्रक ।
वश्यं सम्मोहनं चैव भवेत्तर्पणयोगतः ॥५॥
मोहिनीद्रवसंमिश्रं[11] जलेनैव तु तर्पणम् ।
नेत्रायुतप्रमाणेन जिह्वास्तम्भनमाप्नुयात् ॥६॥
गतिगर्भं[12] च वाक्यानि[13] गात्रं श्रोत्रं तथाक्षिकम् ।
क्षुधा तृष्णा च निद्रा[14] च स्तंभनं च भवेद् ध्रुवम् ॥७॥
निम्बार्कपत्रजद्रावैर्मिश्रितं कूपवारिणा ।
पञ्चायुतं तर्पणेन सद्यो विद्वेषणं भवेत् ॥८॥

---

१. ग. गोमये० । २. घ. पैत्यरोगी । ३. ख. भ्रान्तचित्तो । ग. भ्रान्तान्पैत्ति । घ. भ्रान्तिरोगी । ४. घ. ०त्रि(वि)लेपनं नाम दसमः पटलः । ५. ग. वगलां० । घ. वगलादेवी वासवप्रियमोदिनी । ६. घ. बिभ्रती । ७. घ. मौनि० । ८. घ. ०भूषणे । ९. घ. तर्पणस्य । १०. ख. ग. घ. द्रव्येण । ११. घ. मोहनीद्रवसंयुक्त । १२. ग. गतिस्तंभं । घ. गतिं गर्भं । १३. ग. घ. वाक्पाणि । १४. घ. तृष्णा क्षुधां च निद्रां ।

वज्रार्कक्षीरमिश्रं च 'कान्ता च'[१] तर्पणेन च ।
उच्चाटनं[२] भवेच्छत्रोरयुतत्रयमादरात् ॥९॥

प्रेतान्नं प्रेतभस्मं[३] च प्रेताङ्गारं च पुत्रक ।
समं समं गरं[४] ग्राह्यं जीवेनैव[५] तु मिश्रितम् ॥१०॥

नेत्रायुतं तर्पणेन साक्षाद् रिपुविनाशनम् ।
हयारिपत्रजद्रावैर्मिश्रितं[६] मारणं भवेत् ॥११॥

कर्पूरमिश्रितं तोयं[७] पंचाशच्छतमादरात् ।
नित्यं च तर्पयेद् धीमान् मासमेकमतन्द्रितः ॥१२॥

पुराणज्वरमत्युग्रं[८] पित्तरोगं विनश्यति ।
चन्दनाम्भस्तर्पणेन तापं कृत्रिमजं हरेत् ॥१३॥

कस्तूरीमिश्रितं तोयै राज्यलाभो भवेद् ध्रुवम् ।[९]
यैस्तु[१०] तर्पणमंत्रेषु[११] अयुतं रविसंख्यया[१२] ॥१४॥

कुबेरसदृशः श्रीमान् जायते नात्र संशयः ।
माध्वीद्रव्येण सम्मिश्रं[१३] पूजितं[१४] शुद्धवारिणा ॥१५॥

रत्नायुतं[१५] तर्पणेन लक्ष्मीर्वा[१६] जायते ध्रुवम् ।
गोक्षीरतर्पणेनैव ईप्सितां सिद्धिमाप्नुयात् ॥१६॥

तक्रेण तर्पणं चैव[१७] पित्तरोगं व्यपोहति ।
आरनालेन संतर्प्य जलदोषं च[१८] शाम्यति ॥१७॥

हरिद्राम्भस्तर्पणेन स्त्रीणामाकर्षणं भवेत् ।
शमंतकुसुमेनैव[१९] मिश्रितं जलतर्पणम् ॥१८॥

पुत्रवान् जायते मर्त्यो[२०] अयुतेन न संशयः ।
कदलीफलगोक्षीरं शर्करा च समं समम् ॥१९॥

---

१. '–' ख. करांभः । घ. कोशांभः । २. क. उच्चाटनो । ३. ख. प्रेतभूमि । ४. घ. च सं० । ५. ख. मानेनैव । ६. घ. मयूरपत्रजै द्वारैः० । ७. क. तोये । ८. ग. घ. ०मृत्युग्रं । ९. घ. पुस्तकेऽयं विशेषः पाठः—

"गौडीद्रव्यस्तर्पणेन द्रव्यलाभो भवेद् ध्रुवम् ।"

१०. ख. ग. पैष्टचा । घ. पैष्टी । ११. ख. तर्पणमंत्रेण । ग. तर्पणमात्रेषु । घ. तर्पणमात्रेण । १२. घ. ऋषिसंख्यया । १३. घ. संमिश्र । १४. घ. पूरितं । १५. ख. तत्रायुतं । घ. तत्वायुतं । १६. ख. ग. घ. लक्ष्मीवान् । १७. ख. घ. तर्पणेनैव । १८. ख. प्र । १९. घ. स्यमन्त० । २०. घ. मृत्यो ।

पलाष्टकं च प्रत्येकं मिश्रितं जलतर्पणम् ।
मंत्रसिद्धिविना[1] सिद्धिर्भक्तिवैराग्यमेव च ॥२०॥
भ्रमज्ञानं व्यपोहंति नान्यथा शिवभाषणम् ।
छागरक्तेन संमिश्रं चार्चितं तैलतर्पणात्[2] ॥२१॥
मूकांश्च कुरुते प्राज्ञान्[3] रिपुसंघाननेकशः[4] ।
जलेन मिश्रितं पुत्र शोणितं विड्वराहजम्[5] ॥२२॥
वेदायुतं तर्पणेन उन्मादी जायते रिपुः ।
काकरक्तेन सम्मिश्रं तर्पणं शुद्धवारिणा[6] ॥२३॥
जातिभ्रष्टो भवेच्छत्रुः स भवेन्निन्दको[7] भुवि ।
उलूकरक्तसंमिश्रं वारिणा तर्पणं तथा ॥२४॥[8]
व्रणेन म्रियते शत्रुरयुतद्वयसमंततः[9] ।[10]
श्वानरक्तेन संमिश्रं वारिणा तर्पणं तथा ॥२५॥
श्वानवज्ज्वलते[11] शत्रुर्म्रियते नात्र संशयः ।
मार्जाररक्तसम्मिश्रं[12] तर्पणं वारिणा तथा ॥२६॥
क्षयरोगी भवेच्छत्रुः षण्मासैर्म्रियते रिपुः ।[13]
उष्टरीशोणितं[14] मिश्रं तोये[15] सन्तर्प्पयेत् सह[16] ॥२७॥

---

१. घ. ०ज्ञान । २. घ. तेन तर्पणम् । ३. घ. यत्नाद् । ४. घ. ०संघानमेकशः । ५. घ. विड्वराहकम् । ६. घ. मिष्टवारिणा । ७. घ. सन्ततिर्निन्दिता । ८. ग. घ. पुस्तकद्वये विशेषोऽयं पाठः—

'नेत्रायुतं[1] भवेच्छत्रुर्नेत्ररोगी[2] न संशयः ।
खररक्तेन संमिश्रं वारिणा तर्पणं तथा ॥

९. ख. ०द्वयमन्ततः । ग. ०द्वययोगतः ।
१०. घ. पुस्तके पादद्वयस्थानेऽयमंशो दृश्यते—

तृणवज्ज्वलते शत्रुरयुतं ज्वरयोगतः ।"

११. ख. जायते । ग. घ. जल्पते । १२. घ. ०संयुक्तं । १३. ख. पुस्तकेऽस्मात्परमंशो विशेषः—

"भुजंगशोणितेनैव तर्पयेदर्द्धरात्रके ।
निशि सहस्रमानेन सिद्धं रिपुविनाशनम्" ॥

१४. घ. उष्ट्रस्य शोणितं । १५. ख. तोयैः । घ. तोयं । १६. घ. संतर्प्य बुद्धिमान् ।

---

१. घ. नेत्रायुताद् । २. घ. नेत्रनाशो ।

मासेन शत्रुमरणं मृकंडुसदृशोऽपि वा ।
जपसंख्या यत्र नोक्ता लक्षमेकं कुमारक ॥२८॥
दिनसंख्या यत्र नोक्ता पक्षमेव[१] न संशयः ॥

इति षड्विद्यागमे सांख्यायनतन्त्रे एकादश पटलम्[२] ॥११॥

॥ अथ द्वादशः पटलः ॥

कौलागमैकसंवेद्यां सदा कौलागमाम्बिकाम् ।
भजेऽहं सर्वसिद्धयर्थं बगलां चिन्मयीं हृदि[३] ॥१॥

क्रौंचभेदन उवाच—

नमस्ते सर्वसर्वेश गर्वितासुरभञ्जन ।
गायत्रीं बगलाख्यां च वद मे करुणाकर ॥२॥

ईश्वर उवाच—

मन्त्रोद्धारं प्रवक्ष्यामि मन्त्रमाहात्म्यमेव च ।
पुर[४]श्चर्याप्रयोगं च वक्ष्येऽहं तव पुत्रक ॥३॥
ब्रह्मास्त्रायपदं चोक्त्वा 'विद्महेति पदं ततः'[५] ।
स्तम्भनेति पदं चोक्त्वा बाणाय तदनन्तरम् ॥४॥
धीमहीति पदं चोक्त्वा तन्नः[६] शब्दं ततो(दो)च्यते[७] ।
बगलापदमुच्चार्य उद्धरेच्च प्रचोदयात् ॥५॥
गायत्री बगलानाम्नी सर्वसिद्धिप्रदा भुवि ।
ब्रह्मा ऋषिश्च छन्दोयं(स्य) गायत्री समुदाहृतम्[८] ॥६॥
देवता बगलानाम्नी चिन्मयी[९] शक्तिरूपिणी ।
ॐ बीजं 'चैव शक्तिर्ह्लीं'[१०] कीलकं विद्महे पदम् ॥७॥
चतुर्ल्लक्षं पुरश्चर्य्या तद्दशांशं च तर्प्पणम् ।
तद्दशांशं हुनेदाज्यं तावद्ब्राह्मणभोजनम् ॥८॥
न्यासध्यानादिकं सर्वं कुर्यात् 'तन्मन्त्रतो जपेत्'[११]
प्रयोगानथ वक्ष्यामि गायत्रीबगलाह्वये[१२] ॥९॥

---

१. घ. पक्षसंख्या । २. घ. ०एकादशः पटलः । ३. ग. बगलाख्यं करुणाकरम् । ४. क. पुन । ५. '–' ख. विग्रहेति पदं तथा । घ. विद्महेति ततः पदम् । ६. ग. ततः । घ. तन्नो । ७. ग. घ. ततोच्चरेत् । ८. ख. यमुदाहृतम् ख. वगला । १०. '–' घ. शक्तिह्लीं चैव । ११. '–'घ. तन्मन्त्रराजवत् । १२. ख. ०वगलाह्वया । घ. गायत्र्या वगलाह्वया ।

तारादि प्रजपेन्मन्त्रं मोक्षार्थी[1] च कुमारक ।
शान्त्यर्थं च[2] जपेत्पुत्र शारदाबीजपूर्वकम्[3] ॥१०॥
सम्मोहनार्थं प्रजपेत् कामराजपुरस्सरम् ।
स्तम्भनार्थं प्रजपेच्छक्तिदाहकपूर्वकम्[4] ॥११॥
वाराहं शक्तिवाराहं स्तब्धमायापुरस्सरम् ।
प्रजपेन्मन्त्रमेतद्धि मारणं भवति ध्रुवम् ॥१२॥
वाग्भवादि जपेन्मंत्रं विद्यासिद्धिर्भविष्यति ।
बालादि प्रजपेन्मन्त्रं 'कन्यकां क्षिप्रमाप्नुयात्'[5] ॥१३॥
वाराहीबीजमध्यस्थां[6] गायत्रीं लक्षजापनात् ।
भूलाभं (भो) जायते तस्य अनायासेन[7] पुत्रक ॥१४॥
श्रीबीजादि जपेत् पुत्र गायत्रीं[8] बगलाह्वयाम्[9] ।
कुबेरसदृशः श्रीमान् जायते नात्र संशयः ॥१५॥
तार्क्ष्यबीजादि मंत्रं प्रजपेद् ध्यानपूर्वकम् ।
नानाविषप्रयोगांश्च ग्रहरोगादिनाशनम्[10] ॥१६॥
भैरवीं[11] बीजमाद्यं च प्रजपेच्च कुमारक ।
भूतप्रेतपिशाचाद्यास्तत्प्रयोगाद् व्यपोहति ॥१७॥
जपेदमृतबीजानि[12] गायत्रीं बगलाह्वयाम् ।
तापज्वरमहातापं[13] शमयेत्[14] क्रौञ्चभेदन ॥१८॥
जपेच्च वायुबीजादि गायत्रीं बगलाह्वयाम् ।
क्षिप्रमुच्चाटनं चैव भवेच्छङ्करभाषणम् ॥१९॥
अग्निबीजादिगायत्रीं प्रजपेद् बगलाह्वयाम् ।
महता(दा)तापसंयुक्तः[15] पक्षाच्छत्रुर्मृतो भवेत् ॥२०॥

---

१. घ. मोक्षार्थं । २. घ. प्र । ३. घ. तारावाराहपूर्वकम् । ४. ख. ग. घ. पुस्तकेष्वयं पाठः—
स्तम्भनार्थं जपेत्पुत्र बगलाबीजपूर्वकम् ॥
विद्वेषणार्थं प्रजपेद्धुंकारद्वयपूर्वकम् ।
उच्चाटनार्थं (घ. उच्चाटने) जपेत्पुत्र शक्तिवाराहपूर्वकम् ।
५. ख. कन्याकांक्षी मवाप्नुयात् । ६. घ. वाराहीमध्यबीजस्थां । ७. ग. अत्यायासेन । ८. क. ग. घ. गायत्री । ९. ख. बगलाह्वया । १०. घ. गलरोगादि० । ११. ख. घ. भैरवं । १२. ख. घ. बीजादि । १३. ख. तापज्वरं महातापं । घ. ०महावातं । १४. घ. नाशयेत् । १५. घ. संयुक्तं ।

मायादि प्रजपेत् पुत्र गायत्रीं बगलाह्वयाम् ।[1]
इष्टसिद्धिर्भवेत् क्षिप्रं शिवस्य वचनं यथा[2] ॥२१॥

मन्त्रराजस्य गायत्रीं पादाद्यवयवं[3] तथा ।[4]
गायत्रीं च विना मन्त्रं न सिद्ध्यति कलौ युगे ॥२२॥

पुरश्चरणकाले तु गायत्रीं प्रजपेन्नरः ।
मूलविद्यां[5] दशांशं च मन्त्रसिद्धिर्भवेद् ध्रुवम् ॥२३॥

त्यक्त्वा तन्मन्त्रगायत्रीं यो जपेन्मन्त्रमादरात् ।
कोटिकोटिजपेनैव 'तस्य सिद्धिर्न जायते'[6] ॥२४॥

जपसंख्या यत्र नोक्ता लक्षमेकं कुमारक ।
दिनसंख्या यत्र नोक्ता पक्षमेकं न संशयः ॥२५॥

गायत्री बगलानाम्नी बगलायाश्च जीवनम् ।
मंत्रादौ चाथ मन्त्रान्ते जपेद्[7] ध्यानपुरस्सरम् ॥२६॥

इति षड्विद्यागमे सांख्यायनतन्त्रे द्वादश पटलम्[8] ॥१२॥

॥ अथ त्रयोदशः पटलः ॥

निधाय पादं हृदि वामपाणिना,
जिह्वां समुत्पाटनकोपसंयुताम् ।
दाभिघातेन च फालदेशे[9],
अम्बां भजेऽहं बगलां हृदब्जे ॥

क्रौञ्चभेदन उवाच—

श्रीकण्ठ श्रीगराधार[10] शार्दूलाम्बरभूषण[11] ।
शान्तवद्[12] वद मे पूजां बगलायाश्च शङ्कर ॥२॥

---

१. अतः परं ख. ग. घ. पुस्तकेषु विशेषः पाठः—
"राजा वा राजपुत्रो वा मरणान्तं वशीभवेत् ।
महामाया (ग. मायामाया) दिगायत्रीं प्रजपेद् बगलाह्वयाम् ।"
२. घ. तथा । ३. घ. पादाढ्यावयवं । ४. घ. पुस्तकेऽयं विशेषः—
मंत्रसिद्धिर्भवेत् क्षिप्रं शिवस्य वचनं यथा
५. ख. घ. मूलविद्या । ६. '–' घ. न च सिद्धिर्भवेद् ध्रुवम् । ७. ख. ग. जपे । घ. जप ।
८. घ. ०द्वादशः पटलः । ९. ख. वालदेशे । घ. फालदेशं । १०. घ. श्रीधराधार ।
११. घ. ०भूषणम् । १२. घ. सान्तवद् ।

ईश्वर उवाच–

बिन्दुमध्ये च सम्पूज्य स्वर्णसिंहासनोपरि ।
चिन्मयीं बगलादेवीं सर्वसिद्धिप्रदायिकाम् ॥३॥

चतुर्भुजां च द्विभुजां गदां जिह्वां च बिभ्रतीम् ।
पीतवर्णां महापूर्णामर्चयेन्मूलविद्यया[१] ॥४॥

त्रिकोणे पूजयेत् पुत्र 'वाणीं गौरीं रमां'[२] क्रमात् ।
तत्तद्बीजेन सम्पूज्य तदावाहनपूर्वकम्[३] ॥५॥

पञ्चास्त्रं[४] पञ्चकोणेषु वक्ष्ये तत्पूजनं क्रमात् ।
पूर्वकोणे तु सम्पूज्य अस्त्रं च बगलामुखीम् ॥६॥

द्वितीयकोणे संपूज्य अस्त्रराजं कुमारक ।
उल्कामुखीति विख्यातं तन्मंत्रेणैव पूजयेत् ॥७॥

तृतीयकोणे सम्पूज्य अस्त्रराजं कुमारक ।
'नाम्नी ज्वालामुखीं चैव तन्मन्त्रेणैव पूजयेत्'[५] ॥८॥

'चतुर्थकोणे सम्पूज्य अस्त्रराजं कुमारक'[६] ।
जातवेदमुखीनाम्नीं तन्मन्त्रेणैव पूजयेत् ॥९॥

पञ्चमेषु च कोणेषु अस्त्रराजं कुमारक ।
बृहद्भानुमुखी ख्याता त्रिषु लोकेषु दुर्लभा ॥१०॥[७]

पञ्चकोणेष्वेवमेतत्पञ्चास्त्रं[८] सम्यगर्चयेत् ।
मूलमन्त्रेण तेनैव पूजायन्त्रं कुमारक ॥११॥

तदुपरि समभ्यर्च्य दिक्पालाष्टकमादरात् ।
तद्वाहनं च तच्छक्तिदशायुतपुरस्सरम्[९] ॥१२॥

तदुपरि समभ्यर्च्य मातृकाष्टकमेव च ।[१०]
तदुपरि समभ्यर्च्य विघ्नेशाष्टकमेव च ॥१३॥

---

१. ख. घ. मदाघूर्णा० । ग. महाघूर्णा । २. घ. वाणीगौरीरमाः । ३. घ. तत्ताद्वाहनपूर्त्रकम् । ४. घ. पञ्चास्त्रान् । ५. '–' चिह्नगोंऽशो घ. पुस्तके नास्ति । ६. '–' चिह्नान्तर्गतोंऽशो नावलोक्यते घ. पुस्तके । ७. घ. पद्यमिद नास्ति । ८. घ. पञ्चमेषु च कोणेष्वेवमेव पञ्चास्त्रं । ९. ख. तच्छक्तिदशायुच० । घ. तच्छक्तिस्तदायुध० ।
१०. घ. पुस्तके विशेषः—

"तदुपरि समभ्यर्च्यं भैरवाष्टकमेव च ।"

'पूजायंत्रं क्रमेणैव'[1] एवमेव कुमारक ।
शालग्रामशिलायां वा वह्निमण्डलमध्यमे ॥१४॥

कन्यकां[2] चाथवा पुत्र पूजयेद् बगलाम्बिकाम्[3] ।
उत्तमं[4] युवतीपूजा मध्यमं[5] वह्निमण्डले[6] ॥१५॥

अधमं[7] च शिलापूजा क्रम एष[8] शिवोदितः[9] ।
नमोऽन्तेनैव नाम्ना च पूजयेच्च कुमारक ॥१६॥

एवं च पूजयेत् सम्यक् पुरश्चरणके विधौ ।
द्रव्यं यत्त्रिविधं[10] प्रोक्तं पूजायां च विशेषतः ॥१७॥

गौडी माध्वी च पैष्टी च गौडी चैवोत्तमोत्तमा[11] ।
छागकुक्कुटमत्स्यं[12] च बगलाप्रीतिकारकम् ॥१८॥

त्रिकालं पूजयेद्देवीं त्रिकालं च[13] जपेन्मनुम् ।
यस्य दर्शनमात्रेण पण्डितैर्वाग्विदां वरैः ॥१९॥

तस्य[14] प्रज्ञा पलानीय[15] तमः सूर्योदये[16] यथा[17] ।
तेजोभेदमनेकं च सर्वशत्रौ[18] कुमारक ॥२०॥

वह्नौ यद्वत् प्रविशंति[19] तद्वद्वादय[20] चातुरी[21] ।
बगला मंत्रसिद्धस्य[22] 'हृदये च प्रविश्यति'[23] ॥२१॥

प्रतिवादि[24] भवेत्स्तम्भो[25] बृहस्पतिसमोऽपि च ।
प्रज्ञाकर्षणशक्तिश्च बगला भूतले स्मरेत्[26] ॥२२॥

विद्यामाकर्षणार्थं[27] च स एव च[28] न संशयः[29] ।
ब्रह्मचारी गृही वापि वानप्रस्थोऽथवा यतिः ॥२३॥

---

१. '–' पूजायन्त्रक्रमे चैव । २. ख. कन्यायां । ३. घ. बगलामुखीम् । ४. घ. उत्तमा । ५. घ. मध्यमा । ६. घ. वह्निमण्डलम् । ७. घ. अधमा । ८. ख. एष । ग. एव । घ. त्रय । ९. क. ग. शिवोदिता । १०. च त्रिविधं । ११. क. ग. ०त्तमा । १२. मांसं । १३. घ. प्र । १४. घ. तस्य । १५. घ. पलायंते । १६. घ. सूर्योदयः । १७. घ. तथा । १८. घ. शत्रो । १९. घ. प्रशस्यंति । २०. ख. तद्वद्वाक्पद । २१. घ. चातुरम् । २२. घ. ०मंत्रसिद्धिः स्याद् । २३. '–' घ. दूरादेव प्रदर्शनात् । २४. घ. प्रतिवादी । २५. ख. घ. भवेत् स्तब्धो । २६. ख. स्मृता । २७. घ. विज्ञानाकर्षणार्थं । २८. घ. तु । २९. ख. घ. पुस्तकद्वयेऽधिकोऽयमंशो दृश्यते—

"उल्लंघ्य बगलामंत्रमुपवास(घ. मुपासक)मनन्यधीः" ।
यत्किंचित् कुरुते (घ. क्रियते) कर्म पृथ्वी(घ. शिला)बीजमिवांकुरैः (घ. ०वांकुरः)"

बगलामन्त्रसिद्धस्तु[1] सैव पूज्यो यतीश्वरः[2] ।
बगलामंत्रसिद्धश्च[3] यत्र तिष्ठति भूतले ॥२४॥

पञ्चक्रोशप्रमाणेन विद्वानेव च भासते ।
न भासते चान्यविद्या न स्मरन्न परामुखी[4] ' ॥२५॥

प्रयोगं चैव न भवेद् बगलार्चापरैः[5] पुरा[6] ।
ग्रसने[7] सर्वविद्यानां बगला यैव[8] भूतले ॥२६॥

बगलाया विना मन्त्रं त्रिषु लोकेषु दुर्लभम् ।
तत्सम्प्रदायविधिना[9] साधयेद् बगलामुखीम् ॥२७॥

एवं च बगलामन्त्रं मन्त्रराजमिदं भुवि ॥

इति षड्विद्यागमे सांख्यायनतन्त्रे त्रयोदशं पटलम्[10] ॥१३॥

॥ अथः चतुर्दशः पटलः ॥

सुधाब्धो रत्नपर्य्यङ्के मूले कल्पतरोस्तथा ।
ब्रह्मादिभिः परिवृतां बगलां भावयेद्[11] हृदि ॥१॥

क्रौञ्चभेदन उवाच—

वीर[12] विद्रूप विश्वेश चिदानन्दस्वरूपिणे[13] ।
बगलार्चाविधिं चैव वद मे करुणाकर ॥२॥

ईश्वर उवाच—

'सृष्टिं स्थितिं च संहारं'[14] पूजा च त्रिविधा कलौ ।
केरले सृष्टिरूपा च गर्भकौलागमक्रमात् ॥३॥

अर्चनं गौडदेशे[15] च[16] स्थितिमार्गं[17] कुमारक ।
सारूपा अर्हदेशे तु[18] संहारार्चनमेव[19] च ॥४॥

गुप्तं कौलागमं नाम[20] गौडदेशार्चनादिभिः[21] ।
कामरूपागमं नाम संहारक्रमपूजनम् ॥५॥

---

१. घ. ०सिद्धिस्तु । २. '–' घ. सर्वैः पूज्यो मुनीश्वरैः । ३. घ. ०सिद्धिश्च । ४. घ. तस्य वक्त्रात् पराङ्मुखी । ५. घ. ०र्चापरं । ६. घ. परा । ७. घ. ग्रस्ते । ८. घ. एव । ९. ख. घ. तत्सम्प्रदाय० । १०. घ. ०त्रयोदशः पटलः । ११. घ. चिन्तयेद् । १२. घ. चिद । १३. घ. स्वरूपक । १४. '–' घ. सृष्टिस्थितिश्च संहार । १५. घ. गौडदेश । १६. घ. स्य । १७. ख. स्थितिमार्गे । १८. '–' ख. घ. कामरूपाख्यदेशे तु । १९. घ. संहारक्रममेव । २०. घ. नाम्ना । २१ घ. गौडदेशेऽर्चनं विधिः ।

लाटार्चनं[1] चावलम्ब्य सांख्यायनमुनिस्तथा ।
उक्तवानागमं[2] चैव सृष्टचर्थं[3] शृणु पुत्रक ॥६॥

सर्वाङ्गसुन्दरीं श्यामां सर्वावयवशोभिनीम् ।
नवोढां पुष्पिणीं चैव प्रार्थयेद्विप्रकन्यकाम् ॥७॥

कृष्णाष्टम्यां चतुर्द्दश्यां पौर्णमास्यां कुमारक ।
अथवा भौमवारे च निशा[4] भृगुजवासरे[5] ॥८॥

'सुवासिनीं च[6]' तैलेन कुर्यादभ्यंगनं[7] तथा ।
तूलिकातल्पमानीत्वा[8] आस्तीर्योदङ्मुखेषु[9] च ॥९॥

तस्योपरि ततस्तीर्य[10] शमन्तैर्जातिचम्पकैः ।
कर्पूरं चैव कस्तूरीमिश्रितं चन्दनं तथा ॥१०॥

सर्वाङ्गे लेपनं कुर्याल्लक्ष्मीसूक्तेन बुद्धिमान् ।
पर्य्यङ्कोपरि तत्कन्यां चन्दनेन विलेपिताम् ॥११॥

ध्रुवाद्यैरिति[11] मंत्रेण कुर्याद्दक्षिणतोमुखीम् ।
उन्मुखेत्यर्चनं[12] कुर्यात् श्रीसूक्तेन कुमारक ॥१२॥
पादौ प्रसार्य[13] तत्कन्यां[14] गुप्तेनार्चनमाचरेत् ।
न्यस्त्वा षोढाद्वयं चादौ बगलापञ्जरं न्यसेत् ॥१३॥

कन्यां चैव न्यसेदेवं तत्तदङ्गानि[15] संस्मरेत्[16][17]
गन्धद्वारेति[18] मंत्रेण कुर्यात् कस्तूरिलेपनम् ॥१४॥

मूलमन्त्रेण चाभ्यर्च्य[19] पुष्पमालां समर्चयेत्[20] ।
निवेदयेद् द्रव्यशुद्धिं तत्रैव जपमाचरेत् ॥१५॥

शतं वाऽथ सहस्रं वा मंत्रराजमिदं सुत ।
पुरश्चरणमध्ये तु प्रतिभार्गववासरे ॥१६॥

---

